1650

व्याकरण संस्कृत संपूर्ण

क्र.नं.१८

४८।व्या।५८

# वैदिकी प्रक्रिया

का. राजवाडे संशोधन मंदिर
क्रमांक
हस्त लिखित ग्रंथ संग्रह

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक 19
हस्तलिखित संग्रह.

## ॥ अथ व्याकरणम् ॥

तत्र तावच्चतुर्षु वेदेषु व्याकरणस्य ये सामान्यतो नियमाः संति त इदानीं प्रदर्श्यन्ते। व्याकरणं नाम व्याक्रियंते व्युत्पाद्यंते- अर्थवत्तया प्रतिपाद्यंते शब्दा येन। वि, प्राति॰ आ, प्राति॰ कृ-कृतौ भ्वादि॰ उभ॰ सक॰ अनिट्। करति ते अकार्षीत् अकृत। तनादि॰ उभ॰ सक॰ अनिट्। करोति कुरुते अकार्षीत्। अकृत। इति। ल्युट्। शब्दसाधुताबोधकं शास्त्रम्। इदं व्याकरणं वेदांगत्वेन प्रसिद्धम्। उक्तंच शिक्षायाम्। "शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्"॥ इति। अत्र भगवतः पाणिनेराचार्यस्य कृतानि सूत्राणि संति। तेषामुपरि कानिचित् कात्यायनमुनिकृतानि वार्तिकसूत्राणि संति। सूत्राणां वार्तिकानांच व्यवस्था भगवता पतंजलिमहामुनिना भाष्यद्वारा कृता अत एव व्याकरणमहाभाष्यमिति लोके विख्यातमस्ति॥

वाक्यकारं वररुचिं भाष्यकारं पतंजलिम्॥
पाणिनिं सूत्रकारंच प्रणतोऽस्मि मुनित्रयम्॥१॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात्॥
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥२॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः॥
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः॥३॥
अज्ञानांधस्य लोकस्य ज्ञानांजनशलाकया॥
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥४॥
योऽबबांध विना सूत्रं शब्दरत्नस्रजं धिया॥
अशेषशेमुषीदात्रे तस्मै शेषात्मने नमः॥५॥

योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य तु वैद्यकेन॥
योऽपाकरोत्तं प्रवरं मुनीनां
पतंजलिं प्रांजलिरानतोऽस्मि॥६॥



A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## (१) वृद्धिरादैच्॥ १।१।१॥

वृद्धिरिति। प्रथमाध्याये प्रथम पादे प्रथम सूत्रम्। उभयसंज्ञान्यपि छंदांसि दृश्यंते। तद्यथा। स सुष्टुभा सऋक्वता गणेन। पदत्वात् कुत्वम्। भत्वाज्जस्त्वं न भवति। इति भाष्यवचनम्। अनेनैकस्मिन् शब्दे भपदसंज्ञा कार्यद्वयं वेदेष्वेव भवति नान्यत्र॥ आदैच्च वृद्धिसंज्ञः स्यात्॥ १॥

## (२) स्थानिवदादेशोऽनल्विधौ॥१।१।५६॥

प्रातिपदिकनिर्देशाश्चार्थतंत्रा भवंति। न कांचित् प्राधान्येन विभक्तिमाश्रयंति। यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्येति भाष्यम्। अनेनार्थप्राधान्यं न विभक्तेरिति बोध्यम्॥ आदेशः स्थानिवत् स्यात्। आ दिश- भावे घञ्। प्रकृतिप्रत्ययोपघातककार्यभेदः वर्णस्थाने वर्णान्तरोत्पत्तिरादेशः। स्थानिवदिति। आदिश्यमानयणादेः कारणे इगादौ। न तु स्थान्यलाश्रयविधौ। अनेनेह यकारस्य स्थानिवद्भावे नाच्त्वमाश्रित्यानचिचेति द्वित्वनिषेधो नाशंक्यः। अनल्विधाविति तन्निषेधात्॥ २॥

## (३) नवेति विभाषा॥१।१।४४॥

अर्थगत्यर्थः शब्दप्रयोगः इति भाष्यसूत्रम्। लौकिकवैदिकेषु शब्देषु सार्वत्रिकः समानोयं नियमः॥ ३॥

## (४) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्॥ १।२।४५॥

बहवो हि शब्दा एकार्था भवंति तद्यथा। इंन्द्र। शक्रः। पुरुहूतः। पुरंदरः। कन्दुः, कोष्टः। कुसूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा। अक्षाः। पादाः। माषाः। सार्वत्रिकोयमपि नियमः। यथाग्न्यादयः शब्दाः वेदेषु बह्वर्थवाचकास्त एव बहव एकार्थाश्चेति॥

अर्थवदिति। धातुं प्रत्ययं प्रत्ययांतं च वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्॥ अर्थोस्ति यस्य तत् अर्थवत्। "प्रत्ययग्रहणे तदन्तग्रहणम्"। इतिपरिभाषा। प्रत्ययात् प्रत्ययांत शब्दस्यापि ग्रहणं स्यात्। अत एव वृत्तौ प्रत्ययांत इति शब्दोधिको योजित इति भावः॥४॥



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## (५) ते प्राग्धातोः ॥ १।४।८०॥

छन्दसि परव्यवहितवचनं च ॥ आयातमुपनिष्कृतम्॥ उप प्रयोभिरागतम्॥ अनेन वार्तिकेन गत्युपसर्गसंज्ञकाः शब्दाः क्रियायाः परे दूरे व्यवहिताश्च भवन्तीति ॥ ५॥

## (६) चतुर्थ्यर्थे बहुलं छन्दसि ॥ २।३।६२॥

षष्ठ्यर्थे चतुर्थी वक्तव्या। "या खर्वेण पिबति तस्यै खर्वो जायते। तिस्रो रात्री रिति॥ तस्या इति प्राप्ते एवमन्यत्रापि। अनेन चतुर्थ्यर्थे षष्ठी षष्ठ्यर्थे चतुर्थी द्वे एव भवतः। भगवता महाभाष्यकारेण छन्दोवन्मत्वा ब्राह्मणानामुदाहरणानि प्रयुक्तानि। अन्यथा ब्राह्मणग्रंथस्य प्रकृतत्वाच्छन्दोग्रहणमनर्थकं स्यात् ॥ ६॥

## (७) बहुलं छन्दसि ॥ २।४।३९॥

अनेन अद् धातोः स्थाने घस्लृ आदेशो बहुलं भवति। घस्तान्नूनम्। सग्धिश्च मे। अन्नाम घ म भ्यतो मे द उद्धृतम्। इत्युदाहरणं ज्ञेयम्॥७॥

## (८) बहुलं छन्दसि ॥ २।४।७३॥

वेदविषये शपो बहुलं लुग्भवति। वृत्रं हनति। अहिः शयते। अन्येभ्यश्च भवति। आध्वं नो देवाः। इति ॥ ८॥

## (९) बहुलं छन्दसि ॥ २।४।७६॥

वेदेषु शपः स्थाने श्लुर्बहुलं भवति। दाति प्रियाणि। धाति प्रियाणि। अन्येभ्यश्च भवति। पूर्णां विवष्टि। जनिमा विवक्ति। इति ॥ ९॥

## (१०) सिब्बहुलं लेटि ॥ ३।१।३४॥

सिब् बहुलं छंदसि णिद्वक्तव्यः। "सविता धर्म साविषत्। प्राण आयूंषि तारिषत्"। अयं लेटि विशिष्टो नियमः॥ १०॥

## (११) छन्दसि शायजपि ॥ ३।१।८४॥

शाय च्छंदसि सर्वत्रेति वक्तव्यम्। क सर्वत्र। हौ चाहौ च किं प्रयोजनम्। मही: अस्कभायत्। यो अस्कभायत्। उद्गृभायत्। उन्मथायते त्येवमर्थम्। अयं लोटि मध्यमपुरुषस्यैकवचने परस्मैपदे विशिष्टो नियमः॥ ११॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

× (१२) व्यत्ययोबहुलम् ॥ ३।१।८५॥

सुप्तिङुपग्रह लिंगनराणां कालहलच्स्वरकर्तृयङांच। व्यत्ययमिच्छति शास्त्रकृदेषां सोपिच सिध्यति बाहुलकेन। व्यत्ययो भवति स्यादीनामिति। अनेन विकरणव्यत्ययः।१। सुपांव्यत्ययः।२। तिङांव्य॰।३। वर्णव्य॰।४। लिंगव्य॰।५। पुरुषव्य॰।६। कालव्य॰।७। आत्मने पदव्य॰।८। परस्मैपदव्य॰।९। स्वरव्य॰।१०। कर्तृव्य॰।११। यङ्‌व्यत्ययश्चेति।१२। एतेषां क्रमेणोदाहरणानि॥ युक्ता माता सीद्धुरि दक्षिणायाः१ दक्षिणायामिति प्राप्ते॥ चषालं ये अश्वयूपाय तक्षति२ तक्षंतीति प्राप्ते॥ त्रिष्टुभौजः शुभित सुग्र वीरम्३ शुधित मिति प्राप्ते॥ मधोस्तृप्ता इवासते४ मधुन इति प्राप्ते॥ अधासवीरैर्दशभिर्वियूयाः५ वियूयादिति प्राप्ते॥ श्वोग्नीनाधास्यमानेन श्वः सोमेन यक्ष्यमाणेन६ आधाता यष्टेति प्राप्ते॥ ब्रह्मचारिण मिच्छते।७ इच्छतीति प्राप्ते॥ प्रतीप मन्य ऊर्मिर्युध्यति।८ युध्यत इति॥ आधाता यष्टेति लुट् प्रथमपुरुषस्यैकवचने प्रयोगौ व्यत्ययो भवति स्यादीनामिति। अस्योदाहरणं तासिप्रासे स्यो विहित इति॥ १२॥

× (१३) बहुलंछन्दसि॥ ३।२।८८॥

अनेन क्विप् प्रत्ययो वेदेषु बहुलं विधीयते। मातृहा मातृघातः। इत्यादीनि॥ १३॥

× (१४) छन्दसि लिट्॥ ३।२।१०५॥

वेदेषु सामान्यभूते लिड्विधीयते। अहं द्यावा पृथिवी आततान॥१४॥

× (१५) लिटः कानज्वा॥ ३।२।१०६॥

वेदविषये लिटः स्थाने कानजादेशो वा भवति। अग्निं चिक्यानः। अहं सूर्यमुभयतो ददर्श। प्रकृते पि लिटि पुनर्ग्रहणात् परोक्षार्थस्यापि ग्रहणं भवति॥१५॥

× (१६) क्वसुश्च॥ ३।२।१०७॥

वेदे लिटः स्थाने क्वसुरादेशो वा भवति। पपिवान्। जग्मिवान्। नच भवति। अहं सूर्यमुभयतो ददर्श॥ १६॥

× (१७) क्याच्छन्दसि॥ ३।२।१७०॥

क्यप्रत्ययांताद्धातोश्छंदसि विषये तच्छीलादिषु कर्तृषुउ-



A project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

कार प्रत्ययो भवति। मित्रयुः। संस्वेदयुः। सुम्नयुः। निरनुबंधकग्रहणे सानुबंधकस्यापि ग्रहणं भवति। इत्यनया परिभाषया क्यच् क्यङ् क्यषां सामान्येन ग्रहणं भवति॥ १७॥

× (१८) कृत्यल्युटो बहुलम्॥३।३।११३॥

कृल्ल्युट इति वक्तव्यम्। कृतो बहुलमिति वा। पादहारकाद्यर्थम्। पादाभ्यां ह्रियते पादहारकः। अनेन धातोर्विहिताः कृत् संज्ञकाः प्रत्ययाः कारकमात्रे वेदादिषु द्रष्टव्याः। अयं लौकिकवैदिकशब्दानां सार्वत्रिको नियमोऽस्तीति वेद्यम्॥ १८॥

× (१९) छन्दसि गत्यर्थेभ्यः॥३।३।१२९॥

ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु सत्सु गत्यर्थेभ्यो धातुभ्यश्छन्दसि विषये युच् प्रत्ययो भवति। सूपसदनोऽग्निः॥ १९॥

× (२०) अन्येभ्योऽपि दृश्यते॥३।३।१३०॥

अन्येभ्यश्च धातुभ्यो युच् प्रत्ययो दृश्यते। उ॰। सुदोहनमाकृणोद्ब्रह्मणे गाम्॥ २०॥

× (२१) छन्दसि लुङ्लङ्लिटः॥३।४।६॥

वेदविषये धातुसंबंधेषु सर्वेषु कालेषु लुङ् लङ् लिटः प्रत्यया विकल्पेन भवन्ति। उ॰। लुङ् "अहं तेभ्योऽकरं नमः"। लङ् "अग्निमद्य होतारमवृणीतायं यजमानः"। लिट् "अद्य ममार"॥ २१॥

× (२२) लिङर्थे लेट्॥३।४।७॥

यत्र विध्यादिषु हेतुहेतुमतोः शकीच्छार्थेषूर्ध्वमौहूर्तिकेष्वर्थेषु लिङ् विधीयते। तत्र वेदेष्वेव लेट् लकारो वा भवति। जीवाति शरदः शतमित्यादीन्युदाहरणानि संतीति बोध्यम्॥ २२॥

× (२३) उपसंवादाशङ्कयोश्च॥३।४।८॥

उपसंवादे आशंकायां च गम्यमानायां वेदेषु लेट् प्रत्ययो भवति। उपसंवादे "अहमेव पशूनामीशै"॥ आशंकायां यथा," नेज्जिह्मायंतो नरकं पताम। मिथ्याचरणेन नरकपात आशंक्यते॥ २३॥

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

× (२४) लेटोऽडाटौ ॥३।४।९४॥

लेटः पर्यायेण अट् आट् आगमौ भवतः॥ २४॥

× (२५) आत ऐ ॥ ३।४।९५॥

छन्दस्यनेनात्मने पदे विहितस्य लेडादेशस्य द्विवचनस्य स्याकारस्य स्थाने ऐकारादेशो भवति। मंत्रयैते। मंत्रयेथे ॥२५॥

× (२६) वैतोऽन्यत्र ॥३।४।९६॥

आत ऐ इत्येतस्य विषयं वर्जयित्वा लेट एकारस्य स्थाने ऐकारादेशो वा भवति। अहमेव पशूनामीशै। ईशे वा ॥ २६॥

× (२७) इतश्च लोपः परस्मैपदेषु॥३।४।९७॥

लेटः स्थाने आदिष्टस्य तिबादिस्थस्य परस्मैपदविषयस्येकारस्य विकल्पेन लोपो भवति। उदा॰। तरति १ तराति २ तरत् ३ तरात् ४ तरिषति ५ तरिषाति ६ तरिषत् ७ तरिषात्८ तारिषति ९ तारिषाति १० तारिषत् ११ तारिषात् १२ तरसि १३ तरासि १४ तरः १५ तराः १६ तरिषसि १७ तरिषासि १८ तरिषः १९ तरिषाः २० तारिषसि २१ तारिषासि २२ तारिषः २३ तारिषाः २४ तरामि २५ तराम २६ तरिषामि २७ तरिषाम २८ तारिषामि २९ तारिषाम ३० ॥ एवमेव सर्वेषां धातूनां प्रयोगेषु लेड्विषये बोध्यम्॥ २७॥

× (२८) स उत्तमस्य ॥३।४।९८ ॥

लेट उत्तमपुरुषस्य सकारस्य लोपो वा भवति। करवावः। करवाम। करवामः॥ २८॥

× (२९) तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः॥ ३।४।९॥

धातुमात्रात् तुमुन् प्रत्ययस्यार्थे। से। सेन्। असे। असेन्। कसे। कसेन्। अध्यै। अध्यैन्। कध्यै। कध्यैन्। शध्यै। शध्यैन्। तवै। तवेङ्। तवेन्। इत्येते पंचदश प्रत्यया वेदेष्वेव



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

भवंति। "कृन्मेजन्त" इति सर्वेषामव्ययत्वम्। सर्वेष्वनकारोनुबंधः स्वरार्थः। ककारो गुणवृद्धिनिषेधार्थः। ङकारोपि। शकारः शिदर्थः। (से) वक्षेण्यः। (सेन्) तावामेषे रथानाम्। (असे असेन्) क्रत्वे दक्षाय जीवसे। (कसे कसेन्) श्रियसे। (अध्यै अध्यैन्) कर्मण्युपचारध्यै। (कध्यै) इन्द्राग्नी आहुवध्यै। (कध्यैन्) श्रियध्यै। (शध्यै शध्यैन्) पिबध्यै। सहमादयध्यै। अत्र शित्वात् पिबादेशः। (तवै) सोममिंद्राय पातवै। (तवेङ्) दशमे मासि सूतवे। (तवेन्) स्वर्देवेषु गन्तवे॥ २९॥

(३०) शकि णमुल्कमुलौ॥३।४।१२॥

शक्नोतौ धातावुपपदे धातुमात्रात्तुमर्थे वेदेषु णमुल्कमुलौ प्रत्ययौ भवतः। णकारो वृद्ध्यर्थः। ककारो गुणवृद्धिप्रतिषेधार्थः। लकारः स्वरार्थः। "अग्निं वै देवा विभाजं नाशक्नुवन् विभक्तुमित्यर्थः॥ ३०॥

(३१) ईश्वरे तोसुन्कसुनौ॥३।४।१३॥

ईश्वरशब्द उपपदे वेदे तुमर्थे वर्तमानाद्धातोस्तोसुन्कसुनौ प्रत्ययौ भवतः। ईश्वरोभिचरितोः। कसुन्। ईश्वरो विलिखः॥ ३१॥

(३२) कृत्यार्थे तवैकेन्केन्यत्वनः॥३।४।१४॥

कृत्यानां मुख्यतया भावकर्मणी द्वावर्थौ स्तो ह्रीदयश्च। तत्र वेदविषये तवैकेन। केन्य, त्वन्। इत्येते प्रत्यया भवंति। तवै परिधातवै। (केन) नावगाहे, (केन्य) दिदृक्षेण्यः। शुश्रूषेण्यः। (त्वन्) कर्त्वं हविः॥ ३२॥

(३३) नित्यं संज्ञाछन्दसोः॥४।१।२९॥

अन्नन्ताद्बहुव्रीहे रुपधालोपिनः प्रातिपदिकात् संज्ञायां विषये छन्दसि च नित्यं स्त्रियां ङीप् प्रत्ययो भवति। गौः पंचदाम्नी। एकदाम्नी। इति॥ ३३॥



Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

× (३४) नित्यं छंदसि॥ ४।१।४६॥

बह्वादिभ्यो वेदेषु स्त्रियां ङीप् प्रत्ययो भवति। बह्वीषु हि त्वा प्रपिबन्। इति॥ ३४॥

× (३५) भवे छन्दसि॥ ४।४।११०॥

सप्तमी समर्थात् प्रातिपदिकाद्भव इत्येतस्मिन्नर्थे छंदसि विषये यत् प्रत्ययो भवति। अयमणादीनां घादीनां चापवादः। सति दर्शने तेपि भवंति। मेध्याय च विद्युत्याय च नमः। इतः सूत्रादारभ्य यानि प्रकृतिप्रत्ययार्थ विशेष विधायकानि पाद पर्यन्तानि वेद विषयकाणि सूत्राणि संति तानि यथा।

पाथोनदीभ्यां ड्यण्।१११। वेशन्त हिमवद्भ्यामण्।११२। स्रोतसो विभाषा ड्यड्ड्यौ॥११३। सगर्भसयूथसनुताद्यत्।११४। तुग्राद्घन्।११५। अग्राद्यत्।११६। घच्छौ च।११७। समुद्राभ्राद्घः।११८। बर्हिषि दत्तम्।११९। दूतस्य भागकर्मणी।१२०। रक्षोयातूनां हननी।१२१। रेवतीजगतीहविष्याभ्यः प्रशस्ये।१२२। असुरस्य स्वम्।१२३। मायायामण्।१२४। तद्वानासामुपधानो मंत्र इतीष्टकासु लुक् च मतोः।१२५। अश्विमानण्।१२६। वयस्यासु मूर्ध्नो मतुप्।१२७। मत्वर्थे मासतन्वोः।१२८। मधोर्ञ च।१२९। ओजसोऽहनि यत्खौ।१३०। वेशोयशआदेर्भगाद्यल्।१३१। ख च।१३२। पूर्वैः कृतमिनियौ च।१३३। अद्भिः संस्कृतम्।१३४। सहस्रेण संमितौ घः।१३५। मतौ च।१३६। सोममर्हति यः।१३७। मये च।१३८। मधोः।१३९। वसोः समूहे च।१४०। नक्षत्राद्घः।१४१। सर्वदेवात्तातिल्।१४२। शिवशमरिष्टस्य करे।१४३। भावे च।१४४॥ इति चतुर्थ पादः। इति व्याकरणे चतुर्थोध्यायः॥ ३५॥

× (३६) बहुलं छन्दसि॥ ५।२।१२२॥

वेदेषु समर्थानां प्रथमात् प्रातिपदिकमात्राद्भूमादिष्वर्थेषु विनिः प्रत्ययो बहुलं विधीयते। तद्यथा भूमादयः॥ ३६॥



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

**(३७) तदस्यास्त्यस्मिन्निति मतुप् ॥५।२।९४॥**

भूमनिंदाप्रशंसासु नित्ययोगेतिशायने। संबंधेस्ति विवक्षायां
भवंति मतुबादयः॥१॥ अस्य सूत्रस्योपरि महाभाष्यवचनादेतेषु
ससस्वर्थेषु ते प्रत्यया वेदे लोके चैते मतुबादयो भवंतीति बोध्यम्।
"बहुलम्" अस्मिन् सूत्रे प्रकृतिप्रत्ययरूपविशेषविधायकानि
बहूनि वार्तिकानि संतीति दयानंदः॥ ३७॥

**(३८) अनसन्तान्नपुंसकाच्छन्दसि ॥५।४।१०३॥**

अनसन्तान्नपुंसकाच्छन्दसि वेति वक्तव्यम्। ब्रह्मसामं ब्रह्म
साम। देवच्छन्दसं देवच्छन्दः॥ ३८॥

**(३९) सन्यङोः ॥६।१।९॥**

बह्वर्था अपि धातवो भवंति। तद्यथा। वपि प्रकरणे। दृष्टश्छे
दने चापि वर्तते। केशान् वपति। इडि स्तुति चोदनायां चासु दृष्ट
ईरणे चापि वर्तते। अग्निर्वा इतो वृष्टिमीट्टे। मरुतो मुत [illegible]
श्च्यावयंति। करोतिरयमभूतप्रादुर्भावे दृष्टः। निर्मूलीक
रणे चापि वर्तते। पृष्ठं कुरु पादौ कुरु। उन्मृदानेति गम्यते। नि
क्षेपणेपि वर्तते। कटे कुरु घटे कुरु। अश्मानमितः कुरु स्था
पयेति गम्यते। एतन्महाभाष्यवचनेन तद्विज्ञातव्यम्। धा
तुपाठे येर्था निर्दिष्टास्तेभ्योन्येपि बहवोर्था भवंति। त्रयाणा
मुपलक्षणमात्रस्य दर्शितत्वात्॥ ३९॥

**(४०) शेश्छन्दसि बहुलम् ॥६।१।७०॥**

वेदेषु नपुंसके वर्तमानस्य शेर्लोपो बहुलं भवति। य
था विश्वानि भुवनानीति प्राप्ते विश्वा भुवनानीति भवति॥४०॥

**(४१) बहुलं छन्दसि ॥६।१।३४॥**

अस्मिन् सूत्रे वेदेषु एषां धातूनामप्राप्तमपि संप्रसा
रणं बहुलं विधीयते। संप्रसारणं नाम यणः स्थाने जायमानं



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

नः इक्संज्ञ वर्णः॥ यथा हूमहे इत्यादिषु॥ ४१॥

× (४२) इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च॥६।१।१२७॥

ईषा अक्षादिषु च छन्दसि प्रकृति भाव मात्रं द्रष्टव्यम्। ईषा। अक्षा। ई मिरे इत्यादि प्रासः प्रकृति भावो विहितः॥ ईषा नाम हलयुगयोर्मध्यस्थितकाष्ठम् ॥ ४२॥

× (४३) देवताद्वंद्वेच॥६।३।२६॥

देवतयोर्द्वंद्वसमासे पूर्व पदस्य आनङ् (आ) इत्यादेशो विधीयते। ङित्वादंत्यस्य स्थाने भवति। उदा॰। सूर्याचन्द्रमसौधाता यथा पूर्वमकल्पयत्॥ इन्द्रा बृहस्पती। इत्यादीनि। अस्य सूत्रस्योपरि द्वे वार्तिके स्तः। ते यथा। देवता द्वंद्वे उभयत्र वायोः प्रतिषेधः। अग्निवायू। वाय्वग्नी। ब्रह्म प्रजापत्यादीनांच ब्रह्म प्रजापती। शिव वैश्रवणौ। स्कन्द विशाखौ। सूत्रेण विहित आनङादेशो वार्तिकद्वयेन प्रतिषिध्यते। सार्वत्रिको नियमः॥

अत्र द्वंद्व समासे भट्टोजिदीक्षित आह। ॥न दधिपय उआदीनि॥ एतानि नैकवत्स्युः। दधि पयसी। इध्मा बर्हिषी। निपातनाद्दीर्घः। ऋक्सामे, वाङ्मनसे॥ ॥आनङृतो द्वंद्वे॥ विद्या योनि संबंध वाचिनामृदंतानां द्वंद्वे आनङ् स्यादुत्तर पदे परे। होता पोतारौ। होतृ पोतृ। नेष्टोद्गातारः। माता पितरौ पुत्रेऽन्यस्याभिख्यतो मण्डूकप्लुत्या पुत्र इत्यनुवृत्तेः। पिता पुत्रौ॥ ॥देवताद्वंद्वेच॥ इहोत्तर पदे परे आनङ्। मित्रावरुणौ। इन्द्रा सोमौ। इन्द्रा विष्णू। वायुशब्द प्रयोगे प्रतिषेधः। वार्तिकम्॥ अग्नि वायू। वाय्वग्नी। पुनर्द्वन्द्व ग्रहणं प्रसिद्ध साहचर्यस्य परिग्रहार्थम्। तेन ब्रह्म प्रजापती त्यादौ नानङ्। एतद्धि नैक हवि र्भागित्वेन श्रुतं नापि लोके प्रसिद्ध साहचर्यम्॥ ॥अग्नेः स्तुत् स्तोम सोमाः॥ अग्नेः परेषामेषां सस्य षः स्यात् समासे। अग्निष्टुत, अग्नि ष्टोमः। अग्नीषोमौ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

अग्नी वरुणौ॥ ॥ ईदग्नेः सोमवरुणयोः॥ देवताद्वंद्व इत्येव॥ ॥ इद्वृद्धौ॥ वृद्धिमत्युत्तरपदेऽग्नेरिदादेशः स्यात्। देवताद्वंद्वे अग्ना मरुतौ देवताऽस्याग्निमारुतं कर्म। अग्नी वरुणौ देवताऽस्याग्निवारुणम्। देवताद्वंद्वे चेत्युभयपदवृद्धिः। अलौकिके वाक्ये आनङ्-मीत्वं च बाधित्वा इत्। वृद्धौ किम्। आग्नेंद्रः। नेंद्रस्य परस्येत्युत्तरपदवृद्धिप्रतिषेधः॥ ॥ विष्णौ न॥ अग्नावैष्णवम्॥ ॥ दिवो द्यावा॥ देवताद्वंद्वे उत्तरपदे द्यावाभूमी, द्यावाक्षामा॥ दिवसश्च पृथिव्याम्॥ दिव इत्येव चात् द्यावा। आदेशे अकारोच्चारणं सकारस्य रुत्वं मा भूदित्येतदर्थं द्यौश्च पृथिवी च दिवस्पृथिव्यौ॥ छन्दसि दृष्टानुविधिः॥ द्यावा चिदस्मै पृथिवी। दिवस्पृथिव्योरित्यत्र पदकारा विसर्गं पठंति॥ उषासोषसः॥ उषस्शब्दस्य उषासादेशो देवताद्वंद्वे उषासासूर्यम्॥ ॥ मातरपितरावुदीचाम्॥ उदीचां किम्। मातापितरौ॥ ॥ द्वंद्वाच्चुदषहांतात् समाहारे॥ चवर्गान्ताद् दषहान्ताच्च द्वंद्वाट्टच् स्यात् समाहारे। वाक्त्वचम्। त्वक्स्रजम्। शमीदृषदम्। वाक्त्विषम्। छत्रोपानहम्। समाहारे किम्। प्रावृट्शरदौ। इति द्वंद्व समासः। इत्थं वै व्याकरणसिद्धान्तकौमुद्यां प्रपंचितं तद्द्रष्टव्यम्॥ ४३॥

(४४) बहुलं छन्दसि॥ ७।१।८॥

अनेनात्मनेपदसंज्ञस्य झकारप्रत्ययस्य रुडागमः स्यात्। देवा अदुह्र॥

(४५) बहुलं छन्दसि॥ ७।१।१०॥

अनेन वेदेषु भिसः स्थाने ऐस् बहुलं विधीयते॥ देवेभिर्मानुषे जने॥ ४५॥

(४६) सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः॥ ७।१।३९॥

सुपां च सुपो भवंतीति वक्तव्यम्। तिङां च तिङो भवंतीति च। इयाडियाजीकाराणामुपसंख्यानम्। इया। दार्विया। परिज्मन् डियाच्। सुमित्रिया न आपः सुक्षेत्रिया। सुगात्रुया। ईकारः दृतिं न शुष्कं सरसी शयानम्। आङ्याजयाराञ्चोपसंख्यानम्। आङ् प्रवाहवा। अयाच्। स्वप्नया वावसेचनम्। अयार्। स नः सिंधुमिव नावया। सुप् १ लु-



A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

कु्२ पूर्व सवर्ण ३ आत् ४ शे ५ या ६ डा ७ ड्या ८ याच् ९ आल् १० ड्या ११ ड्याच् १२ ई १३ आड् १४ अयाच् १५ अयार् १६॥ वैदिकेषु शब्देषु ह्येव सुपां स्थाने सुबाद्य यारान्ताः षोडशादेशा विधीयंते। तिङ्च तिङिति पृथङ् नियमः। सुप् १ ऋजवः सन्तु पंथाः पंथान इति प्राप्ते॥ लुक् २ परमे व्योमन्, व्योम्नीति प्राप्ते॥२ पूर्व सवर्ण ३। धीती, मती। धीत्या मत्या इति प्राप्ते॥३। आत्।४ उभयं तारा, उभौ यंतारौ इति प्राप्ते॥४॥ शे।५ न युष्मे वाजबंधवः यूयमिति प्राप्ते।५॥ या।६। उरुया। उरुणा इति प्राप्ते॥६॥ डा।७। नाभा पृथिव्याः। नाभौ इति प्राप्ते।७॥ ड्या।८। अनुष्ट्या, अनुष्टुभा इति प्राप्ते॥८॥ याच्।९। साधुया। साधु इति प्राप्ते।९॥ आल्।१० वसंता यजेत। वसंते इति प्राप्ते। इति॥ ४६॥

× (४७) आज्जसेरसुक्॥ ७।१।५०॥

अनेन प्रथमाया बहुवचने जसः पूर्वमसुक् इत्ययमागमो विहितः। उदा॰। विश्वे देवास आगत। विश्वे देवा इति प्राप्ते। एवं दैव्यासः। तथैवान्यान्यपि ज्ञातव्यानि॥ ४७॥

× (४८) बहुलं छन्दसि॥ ७।३।९७॥

वेदेषु यत्र क्वचि दीडागमो दृश्यते तत्रानेनैव भवतीति बोध्यम्॥

× (४९) बहुलं छन्दसि॥ ७।४।७८॥

अनेनाभ्यासस्य इत् इत्ययमादेशः। श्लौ वेदेषु बहुलं विधीयते॥४९

× (५०) छन्दसीरः॥ ८।२।१५॥

अनेन मतुपो मकारस्य प्राप्तं वत्वं विधीयते। रेवानित्यादि॥

× (५१) कृपो रो लः॥ ८।२।१८॥

संज्ञाछन्दसोर्वा कपिलकादीनामिति वक्तव्यम्। कपिलका। कपिरका। इत्यादीनि॥ ५१॥

× (५२) घि च॥ ८।२।२५॥

घसिभसोर्न सिध्येत्तु तस्मात् सिज्ग्रहणं न तत्। छांद-

सोवर्णलोपो वा। यथेष्कर्तारमध्वरे। निष्कर्तारमध्वरस्येति प्राप्ते। अनेन वेदेषु वर्णलोपो विकल्प्यते। अप्राप्तविभाषेयम्॥ ५२॥

× (५३) दादेर्धातोर्घः॥ ८।२।३२॥

हृग्रहोर्भश्छन्दसि हस्य भत्वं वक्तव्यम्। गर्दभेन संभरति। मरुदस्य गृभ्णाति॥ ५३॥

× (५४) मतुवसोरु सम्बुद्धौ छन्दसि॥ ८।३।१॥

वेदविषये मत्वं तस्य वत्वं तस्य च संबुद्धौ गम्यमानायां रुर्भवति। गोमः। हरिवः। मीढ्वः॥ ५४॥

× (५५) वा शरि॥ ८।३।३६॥

वाशर्प्रकरणे खर्परे लोपो वक्तव्यः। वृक्षा स्थातारः। वृक्षाः स्थातारः। अनेन वायवस्थ इत्यादीति वेदेष्वपि दृश्यन्ते। अतः सामान्योऽयं नियमः सर्वत्र इ॰॥५५॥

शेश्छन्दसि बहुलं आज्जसेरसुक् अनयोः सूत्रयोर्विशेषव्याख्यानं भाष्यकारेणोक्तं तदेवात्र दर्श्यते॥

× (५६) शेश्छन्दसि बहुलम्॥ ६।१।७०॥

अयं योगः शक्योऽवक्तुम्। कथमग्ने त्रीते वाजिना त्री षधस्था ताता पिंडानामिति, पूर्वसवर्णेनाप्येतन्न सिद्धम्। प्रथमयोः पूर्वसवर्णः॥६।१।१०२॥ न सिध्यति नुमा ७।१।७२ नपुंसकस्य झलचः॥ झलचोनुम् विधानुगित् प्रतिषेधः॥ १॥ व्यवहितत्वात्पूर्वसवर्णो न प्राप्नोति। छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यो मधोर्गृण्हाति, मध्वो स्तृ सा इवा सत इत्येवमर्थम्। तत्र पुंवद्भावेन नुमो निवृत्तिः। नुमि निवृत्ते पूर्वसवर्णेन सिद्धम्। भवेत्तु सिद्धमग्ने त्रीते वाजिना त्री षधस्थेति। इदं तु न सिध्यति ताता पिंडानामिति। ६।१।१०४। नादिचि। इदमपि सिद्धं कथं सासमिके सुपां सुलुक्॰ ७।१।३९ पूर्वसवर्णे कृते पुनः प्लाक्षिको भविष्यति। एवमपि जसि गुणः प्राप्नोति। ७।३।१०९ जसि च॥ वक्ष्यत्येतज्जसादिषु च्छंदो वा वचनं प्राङ् णौ च ङ्युपधाया इति। ७।३।१०९। इति ष॰ अ॰ १ पा॰ तृतीयान्हिकम्॥ ५६

× (५७) आज्जसेरसुक्॥ ७।१।५०॥

इह ये पूर्वसोय उपन्यासः आज्जसेरसुगित्यसुकि कृते जसो ग्रहणे न ग्रहणात् शी भावः प्राप्नोति। ७।१।१७ जसः शी। एवं तर्हि जसि पूर्वोन करिष्यते। यदि पूर्वोतः क्रियते का रूपसिद्धिः ब्राह्मणासः पितरः सोम्यासः सवर्णदीर्घत्वेन सिद्धम्। ६।१।१०१॥ अकः सवर्णे दीर्घः॥ होतृ ऋकारः हो-

तृकारः सवर्णदीर्घत्वन्नतिऋवा वचनम्॥ नसिध्यति। "अतो गुणे ६।१।२७। इतिपररूपत्वं प्राप्नोति। अकारोच्चारण सामर्थ्यान्न भविष्यति। यदितर्हि प्रा मुवन्विधि रुच्चारण सामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति। नैष दोषः। यं विधिं प्रत्युपदेशोऽनर्थकः सविधिर्बाध्यते। यस्यतुविधेर्निमित्तं नासौबाध्यते। पररूपंच प्रत्यकारोच्चारण मनर्थकं सवर्णदीर्घत्वस्यपुन र्निमित्तमेव॥ अथवा सुट्करिष्यते " प्रथमयोः पूर्वसवर्णः ६।१।१०२॥ एवमपि "ये पूर्वासो य उपरासः" इत्यसुटिकृते जसो ग्रहणेन ग्रहणाच्छी भावः प्राप्नो ति। नैष दोषः। निर्दिश्यमानस्यादेशा भवंतीत्येवमस्य न भविष्यति। यस्त र्हि निर्दिश्यते तस्य कस्मान्न भवति। असुटा व्यवहितत्वात्। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं ये पूर्वासो य उपरासः। असु किकृते जसो ग्रहणेन ग्रहणाच्छी भावः प्राप्नोति। नैष दोषः। इदमिह सं प्रधार्यम्। शीभावः क्रियतामसुगिति किमत्र कर्तव्यम्। परत्वादसुक्। अ थेदानीमसुकिकृते पुनः प्रसंगविज्ञानाच्छीभावः कस्मान्न भवति?। सकृ द्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति॥ ६।१।३। ष॰अ॰पा॰१ आ॰३॥

## १५७ पूर्वपदात् संज्ञायामगः॥ ८।४।३॥

पूर्वपदात् संज्ञायामुत्तर पदग्रहणम्॥१॥ पूर्वपदात् संज्ञायामुत्तर पदग्रहणं कर्तव्यम्। किं प्रयोजनम्। तद्धित पूर्वपदस्था प्रतिषेधार्थम्॥ २॥ तद्धितस्थस्य पूर्वपदस्थस्य च प्रतिषेधो माभूत्। खारपायणः। ४।१।९९। करणप्रियः। तत्तर्हि वक्तव्यं न वक्तव्यम्। पूर्वपदमुत्तरपदमिति संबंधि शब्दावेतौ। सति पूर्वपद उत्तरपदं भवति सतिचोत्तरपदे पूर्वपदं भवति। त त्संबंधादेतद्गन्तव्यं यत्प्रति पूर्वपदमित्येतद्भवति तत्स्थस्य नियम इ ति किंच प्रत्येतद्भवति। उत्तरपदं प्रति। संज्ञायां नियमवचने गप्रतिषेधा न्नियमस [redacted] प्रतिषेधः॥३॥ संज्ञायां नियमवचनेगप्रतिषेधान्नियमस्यायं प्रतिषेधो विज्ञायतेऽग इति तत्र को दोषः। तत्र नित्यं णत्वप्रसंगः॥४॥ तत्र पूर्वेण। ८।४।१। संज्ञायांचासंज्ञायांच नित्यं णत्वं प्राप्नोति योगविभागा- त् सिद्धम्॥५॥ योगविभागः करिष्यते। पूर्वपदात् संज्ञायाम्। ततोऽगः। गान्तात् पूर्वपदाद्याच यावती णत्वप्राप्तिस्तस्याः सर्वस्याः प्रतिषेधः। अप्रतिषेधो वा यथा सर्वनामसंज्ञायाम्॥६॥ न वार्थः प्रतिषेधेन। णत्वं कस्मान्न भवति। यथा सर्वनामसंज्ञायाम्। उक्तंच सर्वनामसंज्ञायां स र्वनामसंज्ञायां निपातनाण्णत्वाभाव इति। १।१।२७॥ यथा पुनस्तत्र निपातनं क्रियते "सर्वादीनि सर्वनामानि" १।१।२७। इतिहेदानीं किंनि- पातनम्। इहापिनिपातनमस्ति। किम्। अणृगयनादिभ्यः।४।३।७३॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai
Joint project of

इति। नैव वा पुनरत्र पूर्वेण "रषाभ्यां नो णः समानपदे।८।४।१। णत्वं प्राप्नोति किं कारणम्। समानपद इत्युच्यते नचैतत् समानपदम्। समासे कृते समानपदम्। समानमेव यन्नित्यं नचैतन्नित्यं समानपदमेव। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गम्यते। समानग्रहणसामर्थ्यात्। यदि हि यत् समानं चासमानं च तत्र स्यात् समानग्रहणमनर्थकं स्यात्॥ इति व्याकरणमहाभाष्यम्॥ ५८॥

## (५९) उणादयो बहुलम्॥ ३।३।१॥

बहुलवचनं किमर्थं बाहुलकं प्रकृतेस्तनुदृष्टेः। तन्वीभ्यः प्रकृतिभ्य उणादयो दृश्यंते न सर्वाभ्यो दृश्यन्ते। प्रायसमुच्चयनादपि तेषाम्। प्रायेण खल्वपि ते समुच्चिता न सर्वे समुच्चिताः। कार्यसशेषविधेश्च तदुक्तं। कार्याणि खल्वपि सशेषाणि कृतानि न सर्वाणि लक्षणेन परिसमाप्तानि। किं पुनः कारणं तन्वीभ्यः प्रकृतिभ्य उणादयो दृश्यंते न सर्वाभ्यः। किं च कारणं प्रायेण समुच्चिता न सर्वे समुच्चिताः। किं च कारणं कार्याणि सशेषाणि कृतानि न पुनः सर्वाणि लक्षणेन परिसमाप्तानि नैगमरूढिभवं हि सुसाधु॥ इति महाभाष्ये पतंजलिः॥ ५९॥

---

सिद्धान्तकौमुद्यां या वैदिकी प्रक्रिया भट्टोजिदीक्षितैः कृता सैवात्र प्रदर्श्यते। अथ भगवतः पाणिनेराचार्यस्य सूत्राणि॥

१ छन्दसि पुनर्वस्वोरेकवचनम्॥ १।२।६१॥

द्वयोरेकवचनं वा स्यात्। पुनर्वसुर्नक्षत्रं पुनर्वसू वा। लोके तु द्विवचनमेव॥

२ विशाखयोश्च॥ १।२।६२॥ २

प्राग्वत्। विशाखा नक्षत्रं विशाखे॥ २॥

३ षष्ठीयुक्तश्छन्दसि वा॥ १।४।९॥

षष्ठ्यन्तेन युक्तः पतिशब्दश्छन्दसि घिसंज्ञो वा स्यात्॥ क्षेत्रस्य पतिना वयम्। इह वेति योगं विभज्य छन्दसि इत्यनुवर्तते। तेन सर्वे विधयश्छन्दसि वैकल्पिकाः। बहुलं छंदसीत्यादिरस्यैव प्रपंचः। यच्चिमम्॥ नभोंगिरो मनुषां वत्युपसंख्यानम्॥ *॥ नभसा तुल्यं नभस्वत्। भत्वादुत्वाभावः। अंगिरस्वदंगिरः। मनुष्वदग्ने। जनेरुसीति विहित उसि प्रत्ययो मनेरपि बाहुलकात्॥ वृषण्वस्वश्वयोः॥ *॥ वृषन् वर्षकं वसु यस्य स वृषण्वसुः। वृषा अश्वो यस्यासौ वृषणश्वः। इहांतर्वर्तिनी विभक्तिमा



"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रित्य पदत्वे सति नलोप श्रासो भत्वाद्वार्यते। अत एव पदांतस्येति णत्वनिषेधोपि न। अल्लोपोऽन इतितु न। अनंगत्वात्॥ ३

## ४ अयस्मयादीनि च्छन्दसि ॥ १। ४। २०॥

एतानि छंदसि साधूनि। भपदसंज्ञाधिकाराद्यथा योग्यं संज्ञाद्वयं बोध्यम्। तथा च वार्तिकम्। उभयसंज्ञान्यपीति वक्तव्यमिति * ॥ ससुष्टुभा सऋक्वता गणेन। पदत्वात् कुत्वम्। भत्वाज्जश्त्वाभावः। जश्त्वविधानार्थायाः पदसंज्ञाया भत्वसामर्थ्येन बाधात्। नैनं हिन्वंत्यपि वाजिनेषु। अत्र पदत्वाज्जश्त्वम्। भत्वात् कुत्वाभावः॥ ते प्राग्धातोः॥

## ५ छन्दसि परेऽपि ॥ १। ४। ८१॥ ६ व्यवहिताश्च ॥ १। ४। ८२॥

हरिभ्यां याह्योक आ। आ मंद्रैरिन्द्र हरिभिर्याहि॥ ५। ६ ॥

## ७ इन्धि भवतिभ्यां च ॥ १। २। ६॥

आभ्यां परोऽपि लिट् कित् स्यात्। समीधे दस्युहंतमम्। पुत्र ईधे अथर्वणः। बभूवा इदं प्रत्याख्यातम्। इन्धेश्छन्दो विषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति॥ ७॥ इति प्र॰ १ अध्यायः॥

---

## १ तृतीया च होश्छन्दसि ॥ २। ३। ३॥

जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च। यवाग्वाग्निहोत्रं जुहोति। अग्निहोत्र शब्दोऽत्र हविषि वर्तते। यस्याग्निहोत्रमधिश्रितममेध्यमापद्येतेत्यादि प्रयोग दर्शनात्। अग्नये हूयत इति व्युत्पत्तेश्च। यवाग्वाख्यं हविर्देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः॥ १॥

## २ द्वितीया ब्राह्मणे ॥ २। ३। ६०॥

ब्राह्मण विषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात्। षष्ठ्यपवादः। गामस्य तदहः सभायां दीव्येयुः॥ २

## ३ चतुर्थ्यर्थे बहुलं छन्दसि ॥ २। ३। ६२॥

षष्ठी स्यात्। पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते। वनस्पतीनाम्। वनस्पतिभ्य इत्यर्थः। षष्ठ्यर्थे चतुर्थी वाच्या * ॥ या खर्वेण पिबति तस्यै खर्वः॥ ३॥

## ४ यजेश्च करणे ॥ २। ३। ६३॥

इह छन्दसि बहुलं षष्ठी॥ घृतस्य घृतेन वा यजते ॥ ४

## ५ बहुलं छन्दसि ॥ २। ४। ३९॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

च्लेश्चङ् न। मात्वायतो जरितुः कामभूनयीः। मात्वा मित्रि ध्वैनयीत्॥

× ४ कृमृदृरुहिभ्यश्छन्दसि॥३।१।५९॥

च्लेरङ् वा। इदं ते भ्यो करं नमः। अमरत्। अदरत्। यत्सानोः सानु मारुहत्॥ ४॥

× ५ छन्दसि निष्टर्क्यदेवहूय प्रणीयोन्नीयोच्छिष्य मर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्र तिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि॥३।१।१२३॥

कृन्ततेर्निस्पूर्वात् क्यपि प्राप्ते ण्यत्। आद्यंतयोर्विपर्यासः निसः षत्वंच। निष्टर्क्यं चिन्वीत पशुकामः। देवशब्दे उपपदे ह्वयते र्जुहोतेर्वा क्यप् दीर्घश्च। स्पर्धन्ते वा उ देवहूये। प्र उत् आभ्यां न यतेः क्यप्। प्रणीयः। उन्नीयः। उत्पूर्वा [illegible] च्छिषेः क्यप्। उच्छिष्यः। मृङ् स्तृञ् ध्वृभ्यो यत्। मर्यः। स्तर्या। स्त्रिया मे वायम्। ध्वर्यः। खने र्यत् ण्यतौ। खन्यः। खान्यः। यजेर्यः। शुन्धध्वं दैव्याय कर्मणे देवयज्यायै। आङ्पूर्वात् पृच्छेः क्यप्। आपृच्छ्यं धरुणं वाज्यर्षति। सीव्यतेः क्यप् षत्वंच। प्रतिषीव्यः। ब्रह्मणि वदेर्ण्यत्। ब्रह्मवाद्यम्। लोके तु वदः सुपि क्यप् चेति क्यप्ण्यतौ। भवतेः सौ तेश्च ण्यत्। भाव्यः। स्ताव्यः। उपपूर्वाच्चिनोतेर्ण्यत् आयादेशश्च पृडे उत्तरपदे। उपचाय्यपृडम्॥ हिरण्य इति वक्तव्यम् ॥ उपचेयपृडमन्यत्। मृड सुखने पृड चेत्यस्मादिगुपधलक्षणः कः॥ ५ ॥

× ६ छन्दसिवनसनरक्षिमथाम्॥३।२।२७॥

एभ्यः कर्मण्युपपदे इन् स्यात्। ब्रह्मवनिं त्वा क्षत्रवनिम्। उत नो गोषणिं धियम्। ये पथां पथिरक्षयः। चतुरक्षौ पथिरक्षी। हविर्मथीनामभि॥

× ७ छन्दसि सहः॥३।२।६३॥

सुप्युपपदे सहेर्ण्विः स्यात्। पृतनाषाट्॥ ७

× ८ वहश्च।३।२।६४॥

प्राग्वत्। दित्यवाट्। योगविभाग उत्तरार्थः॥ ८ ॥

× ९ कव्यपुरीषपुरीष्येषु ञ्युट्॥३।२।६५॥

एषु वहेर्ञ्युट् स्याच्छन्दसि। कव्यवाहनः। पुरीषवाहनः। पुरीष्यवाहनः॥



"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

× १० हव्येऽनन्तः पादम् ॥ ३।२।६६॥

अग्निश्च हव्यवाहनः। पादमध्ये तु वहश्चेति ण्विरेव। हव्यवाळग्निरजरः पिता नः॥ १० ॥

× ११ जनसनखनक्रमगमो विट् ॥३।२।६७॥

विड्वनोरित्यात्वम्। अब्जाः। गोजाः। गोषा इन्दो नृषा असि। सनोतेरन इति षत्वम्। इयं शुष्मेभिर्बिसखा इवारुजत्। आ दधिक्राः शवसा पंच कृष्टीः। अग्रेगाः॥ ११ ॥

× १२ मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ॥३।२।७१॥

श्वेतवहादीनां डस्पदस्येति वक्तव्यम् * ॥ यत्र पदत्वं भावि तत्र ण्विनोऽपवादो डस् वक्तव्य इत्यर्थः। श्वेतवाः। श्वेतवाहौ। श्वेतवाहः। उक्थानि उक्थैर्वा शंसति उक्थशा यजमानः। उक्थशासौ। उक्थशासः॥ पुरो दाश्यते दीयते पुरोडाः॥ १२

× १३ अवे यजः॥ ३।२।७२॥ अवयाः। अवयाजौ। अवयाजः॥

× १४ अवयाः श्वेतवाः पुरोडाश्च ॥८।२।६७॥

एते संबुद्धौ कृतदीर्घा निपात्यन्ते। चादुक्थशाः॥ १४ ॥

× १५ विजुपे छन्दसि ॥ ३।२।७३॥

उपे उपपदे यजेर्विच्। उपयट् ॥ १५ ॥

× १६ आतो मनिन् क्वनिब्वनिपश्च ॥ ३।२।७४॥

सुप्युपसर्गे चोपपदे आदन्तेभ्यो धातुभ्यश्छन्दसि विषये मनिनादयस्त्रयः प्रत्ययाः स्युः। चाद्विच्। सुदामा। सुधीवा। सुपीवा। भूरिदावा। घृतपावा। विच्। कीलालपाः॥ ब्रह्मभ्रूणवृत्रेषु क्विप्॥

× १७ बहुलं छन्दसि ॥ ३।२।८८ ॥

उपपदांतरेऽपि हन्तेर्बहुलं क्विप् स्यात्। यो मातृहा पितृहा ॥ १७

× १८ छंदसि लिट् ॥ ३।२।१०५॥

भूतसामान्ये। अहं द्यावापृथिवी आ ततान ॥ १८

× १९ लिटः कानज्वा ॥३।२।१०६॥ क्वसुश्च ॥३।२।१०७॥

छन्दसि लिटः कानच् क्वसू वा स्तः। चक्राणा। वृष्णिम्। यो नो



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अग्ने अररिवां अघायुः॥ १९

× २० णेश्छन्दसि॥ ३।२।१३७॥

ण्यन्ताद्धातोश्छन्दसि इष्णुच् स्यात्तच्छीलादौ। वीरुधः पारयिष्णवः॥२०

× ॥ २१ भुवश्च॥ ३।२।१३८॥

अस्मात् केवलात् प्राग्वत् भविष्णुः॥ छन्दसि परेच्छायां क्यच उपसंख्यानम्॥ *

× २२ क्याच्छन्दसि॥३।२।१७०॥

उ प्रत्ययः स्यात्। अघायुः। एरजधिकारे जवसवौ छन्दसि वाच्यौ *॥ जवे याभिर्यूनः। ऊर्वो मे जवः। देवस्य सवितुः सवे॥ २२॥

× २३ मंत्रेवृषेषपचमनविदभूवीरा उदात्तः॥३।३।९६॥

वृषादिभ्यः क्तिन् स्यात्स चोदात्तः। वृष्टिं दिवः सुम्नमिष्टये। पचात्पक्तीरुत। इयं ते नव्यसी मतिः। वित्तिः। भूतिः। अग्न आयाहि वीतये। रातौ स्याम भयासः॥ २३॥

× २४॥ छन्दसि गत्यर्थेभ्यः॥३।३।१२९॥

ईषदादिषूपपदेषु गत्यर्थेभ्यो धातुभ्यश्छंदसि युच् स्यात्। स्वक्लोऽपवादः। सूपसदनोऽग्निः॥ २४॥

× २५ अन्येभ्योऽपि दृश्यते॥३।३।१३०॥

गत्यर्थेभ्यो येऽन्ये धातवस्तेभ्योऽपि छंदसि युच् स्यात्। सुवेदनामकृणोर्ब्रह्मणे गाम्॥ २५

× २६ छन्दसि लुङ्लङ्लिटः॥३।४।६॥

धात्वर्थानां संबंधे सर्वकालेष्वेते वा स्युः। पक्षे यथास्वं प्रत्ययाः। देवो देवेभिरागमत्। अत्र लोडर्थे लुङ्। इदं तेभ्योऽकरं नमः। लङ्। अग्निमद्य होतारमवृणीतायं यजमानः। लिट्। अद्य ममार। अद्य म्रियत इ०॥

× २७ लिङर्थे लेट्॥ ३।४।७॥

विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् स्याच्छन्दसि॥ २७

× २८ सिब्बहुलं लेटि॥ ३।१।३४॥ २९ इतश्च लोपः परस्मैपदेषु॥ ३।४।९७॥ लेटस्तिङामितो लोपो वा स्यात् परस्मैपदेषु॥

× ३० लेटोऽडाटौ॥ ३।४।९४॥

लेटः अट् आट् एतावागमौ स्तस्तौ च पितौ। सिब्बहुलं णि



"Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai's joint project"

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com